NS – 100

# I Semester B.Com. Examination, Nov./Dec. 2016
## (Freshers + Repeaters) (CBCS)
## (2014 – 15 and Onwards)
## LANGUAGE SANSKRIT – I
## Yakshaprasna Sangraha, Grammar and Comprehension

Time : 3 Hours　　　　Max. Marks : 70

***Instructions :*** *1) Answer in **Sanskrit / Kannada / English.***
*2) Answer Question **I, V** and **VI** in **Sanskrit** only.*

I. समीचीनं उत्तरं चिनुत :　　　　**(10×1=10)**

ಸರಿಯಾದ ಉತ್ತರವನ್ನು ಆರಿಸಿ ಬರೆಯಿರಿ :

Select the correct answer :

1) महाभारतस्य कर्ता क: ?

अ) वाल्मीकि:　आ) कालिदास:　इ) माघ:　ई) वेदव्यास:

2) महाभारते कति पर्वा: सन्ति ?

अ) एकादश　आ) द्वादश　इ) अष्टादश　ई) दश

3) हतान् भ्रातृन् दृष्ट्वा क: विललाप ?

अ) भीम:　आ) नकुल:　इ) अर्जुन:　ई) युधिष्ठिर:

4) यक्षाऽहमस्मि इति क: वदति ?

अ) यमधर्मराज:　आ) इन्द्र:　इ) गन्धर्व:　ई) भूत:

5) केन बुद्धिमान् भवति ?

अ) वृद्धसेवया　आ) देवसेवया　इ) भूतसेवया　ई) प्राणिसेवया

6) आतुरस्य किं मित्रम् ?

अ) पिता　आ) भिषक्　इ) औषधं　ई) मधु:

7) भृत्येषु दानं किमर्थम् ?

अ) धर्मार्थम्　आ) भरणार्थम्　इ) यशोऽर्थम्　ई) भयार्थम्

8) किं हित्वा अर्थवान् भवति ?

अ) कामं　आ) क्रोधं　इ) मोहं　ई) लोभं

P.T.O.

9) धैर्यं किम् इति ऋषिभिरूक्तं ?

अ) मनोनिग्रहः आ) भृत्यनिग्रहः इ ) इन्द्रियनिग्रहः ई) शत्रुनिग्रहः

10) भीमस्य अपरं नाम किं ?

अ) वृकोदरः आ) मारुतिः इ ) बलवान् ई) महानसः

II. द्वयोः प्रश्नयोः उत्तरं लिखत : (2×10=20)

ಎರಡು ಪ್ರಶ್ನೆಗಳಿಗೆ ಉತ್ತರಿಸಿ :

Answer **any two** questions :

1) महाभारतस्य विकासमधिकृत्य प्रबन्धं लिखत ।

ಮಹಾಭಾರತದ ವಿಕಾಸವನ್ನು ಕುರಿತು ಪ್ರಬಂಧ ಬರೆಯಿರಿ.

Write an essay on the development of the epic Mahabharatha.

2) यक्षप्रश्नसंग्रहस्य कथां संग्रह्य लिखत ।

ಯಕ್ಷಪ್ರಶ್ನೆ ಸಂಗ್ರಹದ ಕಥೆಯನ್ನು ಸಂಗ್ರಹವಾಗಿ ಬರೆಯಿರಿ.

Write in brief the story of yakshaprashna sangraha.

3) युधिष्ठिरस्य विलापं विशदयत ।

ಯುಧಿಷ್ಠಿರನ ವಿಲಾಪವನ್ನು ವಿವರಿಸಿ.

Describe the lamentations of Yudhisthira.

III. त्रयाणां श्लोकानां अनुवादं कृत्वा विवृणुत : (3×4=12)

ಮೂರು ಶ್ಲೋಕಗಳನ್ನು ಅನುವಾದಿಸಿ ವಿವರಿಸಿ :

Translate and explain **any three** slokas :

1) देवाश्चापि यदावोचन् सूतके त्वां धनञ्जय ।
सहस्राक्षादनवरः कुन्ति पुत्रस्तवेति वै ।।

2) नैषां शस्त्रप्रहारोऽस्ति पदं नेहास्ति कस्यचित् ।
भूतं महदिदं मन्ये भ्रातरो येन मे हताः ।।

3) मा तात साहसं कार्षीः मम पूर्वपरिग्रहः ।
प्रश्नानुक्त्वा तु कौन्तेय ततः पिब हरस्व च ।।

4) इष्वस्त्रमेषां देवत्वं यज्ञ एषां सतामिव ।
भयं वै मानुषो भाव: परित्यागोऽसतामिव ।।

5) पुत्र आत्मा मनुष्यस्य भार्या दैवकृत: सखा ।
उपजीवनं च पर्जन्य: दानमस्य परायणम् ।।

IV. **द्वयो:** वाक्ययो: ससन्दर्भं विवृणुत : **(2×4=8)**

ಎರಡು ವಾಕ್ಯಗಳನ್ನು ಸಂದರ್ಭ ಸಹಿತ ವಿವರಿಸಿ :

Explain with reference to context **any two** sentences :

1) अहं बक: शैवल मत्स्यभक्ष्य: ।
2) यथा प्रज्ञं तु ते प्रश्नान् प्रतिवक्ष्यामि ।
3) सत्यमेकपदं स्वर्ग्यं ।
4) स्नानं मनोमलत्याग: ।

V. **संस्कृत** भाषया उत्तरं लिखत :

a) **पञ्चानां** लिङ्ग –विभक्ति – वचनानि लिखत । **(5×1=5)**

1) भ्रातॄन्
2) महाबलौ
3) अहं
4) रुद्राणां
5) तस्मात्
6) गृहे
7) भृत्येषु
8) सखा.

b) **पञ्चानां** लकार–पुरुष – वचनानि लिखत । **(5×1=5)**

1) हरस्व
2) वक्ष्यामि
3) विन्दते
4) तिष्ठति

5) मरिष्यति

6) उच्यते

7) व्रजेत्

8) गच्छ.

VI. इमं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत । (5×2=10)

भारतवर्षे सर्वासु वनस्पतिषु तुलसीपादप: सर्वाधिकम् आदरं प्राप्यते । अस्मिन् पादपे असंख्याका: गुणा: सन्ति । अस्य काष्ठं, पत्राणि च स्वास्थ्यकारीणि, रोगरोधकानि आयुष्यवर्धकानि च विद्यन्ते । भागवत पुराणे इदमपि कथितं यत् तुलसीपादपानां वने यमदूता: अपि प्रवेष्टुं न शक्यन्ते इति । तुलसी तु भगवत: विष्णो: प्रिया सहचरी । अत एव सा 'विष्णुकान्ता' 'केशवप्रिया' इत्यादि नामभि: प्रसिद्धा । तुलस्या: अपरं प्रमुखं नाम 'वृन्दा' अपि अस्ति । वृन्दावने सर्वत्र वृन्दाय: एव पादपा: आसन् अतएव तत्स्थानं वृन्दावनं जातम् । चिकित्साक्षेत्रे तुलस्या: महिमा गरीयसी । प्रभातवेलायां प्रथमं तुलसीपत्रसेवनं हृदयरोगे लाभकारी भवति । जम्बीररसेन सह मुखे लेपनेन वदनस्य कान्ति: वर्धते । अत एव नेदं आहचर्यं यत् ईदृशी गुणसम्पन्ना तुलसी भारतीयै: 'देवी' पदे प्रतिष्ठिता सुपूजिता च ।

प्रश्ना :

1) भारतवर्षे सर्वासु वनस्पतिषु का अधिकम् आदरं प्राप्यते ?

2) तुलसीपादपानां वने के प्रवेष्टुं न शक्यन्ते ?

3) तुलसी कस्य प्रिया सहचरी ?

4) तुलस्या: अपरं नाम किं ?

5) भारतीयै: तुलसी कस्मिन् पदे प्रतिष्ठिता सुपूजिता च ?

---